# अथ पूर्वमीमांसाकारिका

श्रीकृष्णाय नमः ।

लौकिको वैदिकश्चैव मार्गो नित्यो द्विधा मतः ।
प्रवाहेण स्वरूपेण नित्यत्वं च तयोः क्रमात् ॥ १ ॥

अर्थः प्रधानं लोके हि शब्दोऽन्यस्मिन्निति स्थितिः ।
जलाग्न्योरिव संरक्षा तयोः कार्या मनीषिभिः ॥२॥

लोके जलं द्वितीयस्तु दहनो वैरिणौ मिथः ।
लोकदृष्ट्या यदा वेदः स्पृश्यते नाशमेति हि ॥ ३ ॥

लौकिकं सहसा वेदो न हि बाधितुमर्हति ।
यथा पात्रव्यवहितं वह्निना शुष्यते जलम् ॥ ४ ॥

तथाधिकारिचित्तस्थो लोको वेदेन शुष्यति ।
धर्मार्थकाममोक्षाख्या वर्णानां प्रतिलोमतः ॥ ५ ॥

नियतः पूर्वभावी तु परांगं सति निश्चितम् ।
सतः शूद्रस्य नार्थाद्या मोक्षो हि ब्राह्मणे स्थितः ॥६॥

धर्मार्थकामैः साध्यः स नान्यथा ब्रह्मता भवेत् ।
सेवाधर्मस्तु शूद्रस्य नान्यो ह्युत्तरसाधकः ॥ ७ ॥

अर्थादिसाधको धर्मो वर्णिनामिति निश्चयः ।
तत्रापि वैदिको धर्मो मोक्षांतो ब्राह्मणे स्थितः ॥ ८ ॥

मोक्षो हि लौकिकः शुष्येदतो वेदस्य तत्फलम्।
फलं सुखं तस्य काष्ठा ब्रह्मानंद इति स्थितिः ॥ ९ ॥
सच्चिद्रूपं च तच्चेति केचित्तत्रैव संस्थिताः।
गृहस्थानमातिथिवद्गृहस्था इव के चन ॥ १० ॥
अतः साधकपक्षस्तु मुख्यः साभिमतेर्महान्।
अतो धर्मस्य जिज्ञासा कर्तव्या सर्वथा द्विजैः ॥ ११ ॥
जैमिनिः कर्मतत्त्वज्ञः प्रतिज्ञां तत्करोति हि।
स्वातंत्र्येऽपि च संसिध्येन्मीमांसायाः फलं महत् ॥ १२ ॥
पुराणपंक्तिपाठेन शिक्षाद्यंगेष्वपाठतः।
नैतावता लौकिकत्वं स्वरूपेण फलेन वा ॥ १३ ॥
वेदैकविषयत्वेन गुणत्वात्तु प्रतीतितः।
तथापि वैदिकानां हि संतोषो नैव जायते ॥ १४ ॥
वेदार्थमात्रकृतिनामप्रवृत्तिश्च संभवेत्।
विचारानंतरं ह्येवं तथाप्यत्याग्रहो यदि ॥ १५ ॥
संदेहवारणं शास्त्रं तदैतत्सुविनिश्चितम्।
ऋषेरकौशलं तु स्यात्फलतस्तुल्यता तयोः ॥ १६ ॥
स्वाध्यायविधिमूलत्वं तदा ह्यस्य भविष्यति।
सुष्ठ्वा समंतादध्येयः स्वाध्यायो वेद उच्यते ॥ १७ ॥
देशकालादिनियमा निःसंदेहश्च सर्वतः।
अपमर्गद्वयादर्थस्तथाध्येयो न चान्यथा ॥ १८ ॥

पाठे ह्यर्थं ह्यनुष्ठाने शिक्षादीनां द्वयं द्वयम् ।
वाक्यार्थस्य तु निर्धारो न शक्यस्तैः कथं चन ॥१९॥
अतो वाक्यार्थनिर्धारे मीमांसैव गतिर्भवेत् ।
निर्धारितं ततो ह्यर्थं महावाक्यैकगोचरम् ॥ २० ॥
स्वयं च गुरुतो ज्ञातं प्रतिज्ञां यां करोति च ।
यज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्रथमान्यासन्॥
वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः ।
वेदोऽखिलो धर्ममूलमित्यादिश्रुतिभिः स्फुटम् ॥२२॥
वेदार्थो धर्म एवेति स्वयं निश्चित्य सर्वतः ।
जिज्ञासां प्रतिजानीते धर्मस्येत्यथ के चन ॥ २३ ॥
वेद एव द्विजातीनां निःश्रेयसकरः परः ।
अतस्तदर्थसंसिद्धौ सर्वं सेत्स्यति सर्वतः ॥ २४ ॥
अथातो धर्मजिज्ञासा सूत्रमाद्यमिदं ततः ।
शास्त्रारंभेऽथशब्दस्तु श्रुत्या मंगलबोधकः ॥ २५ ॥
अर्थांतरे विकल्पो हि अधिकारे स्वतंत्रता ।
अथाधिक्रियते यस्माद्धर्मज्ञानात्फलं महत् ॥ २६ ॥
अतो धर्मावबोधाय विचारो योगरूढितः ।
अध्याहारो न कर्तव्यो नाप्यर्थापत्तिकल्पना ॥ २७ ॥
स्नानस्मृतेरबाधश्च ज्ञेयश्चेति विधेर्बलात् ।
प्रवृत्तिरत्र विप्राणां वैदिकत्वं ततो भवेत् ॥ २८ ॥

विधिव्यापारविषया गृहमेधीयरात्रिवत् ।
शब्दतो वैदिकत्वं हि समायात्यर्थतोऽन्यथा ॥ २९ ॥
शब्दतो वैदिकत्वार्थमध्याहारादिकल्पना ।
असंगतिश्चास्य भवेत्सूत्रस्य स्वार्थता यदि ॥ ३० ॥
परार्थो न तु तैः शक्यः स्वकृतिश्च निरर्थिका ।
अतोऽधिकार एवार्थो युक्तः स्वातंत्र्यमस्य हि ॥३१॥
न दोषाय निराकार्यमथर्वांगत्वदृष्टितः ।
अथर्वांगत्वमायाति ह्यर्थज्ञानोपयोगतः ॥ ३२ ॥
अनुवादत्वसापेक्षत्वासस्त्राप्रमाणताम् ।
परिहर्तुं प्रवृत्त्यर्थं चाध्याहारं विधेर्जगौ ॥ ३३ ॥
ज्ञाने क्षयोऽस्तु विषयसौंदर्यकरणादिना ।
लभ्यत्वान्न विधेयत्वं विमृश्यो लक्ष्यते ततः ॥ ४४ ॥
यच्चिवच्छासाध्यताभावात्साक्षाज्ज्ञानस्य तत्कृतेः ।
तन्निर्वाहकताक्षेपस्तत्रापूर्वेष्वसाम्यतः ॥ ३५ ॥
तस्याक्षेपैकलभ्यत्वाद्यागवज्ज्ञानगो विधिः ।
भवेत्तस्यान्यतः प्राप्तेर्न स स्यादिति सन्मतिः ॥३६॥
फलाधिकारसाकांक्षत्वतोऽनर्थत्वशंकितम् ।
चतुः साधनसंपन्नप्राप्त्यानंतर्यवाचिना ॥ ३७ ॥
अथशब्देनापनोद्याभाव्यत्वात्फलतापि च ।
ब्रह्मज्ञानस्य तस्यापि फलत्वं नोपपद्यते ॥३८॥

सुखदुःखाभावरूपत्वाभावादिति चेन्न हि।
अथशब्दोऽत्राधिकारिविशेषणतया स्थितः ॥३९॥
मोक्षः संबध्यते यस्मात्फलत्वेनाथ मोचने।
विशेषणत्वकाम्यत्वपक्षाभ्यां फलता न हि ॥४०॥
जीवनागारदेहादेरपि तत्त्वप्रसंगतः।
प्रायश्चित्ते परस्त्रीणामपि तत्त्वप्रसंगतः ॥४१॥
उच्यते काम्यतायां तद्विधिबोध्यैकसाध्यता।
प्रयोजिका फलत्वे हि तस्मात्सुष्ठूक्तमार्थिकम् ॥४२॥

इति श्रीमद्वल्लभाचार्यविरचिताः पूर्वमीमांसाकारिकाः संपूर्णाः।

# अथ श्रीभगवत्पीठिका।

श्रीकृष्णाय नमः।

श्रीपुरुषोत्तमस्य त्रीणि स्वरूपाणि–एकम् आधिभौतिकं, द्वितीयम् आध्यात्मिकं, तृतीयम् आधिदैविकम्। आधिभौतिको नारायणो लक्ष्मीपतिः। तत्क्षरःस्वरूपम्, आध्यात्मिकं ब्रह्म अक्षरम्, आधिदैविकं पुरुषोतमः, सच्चिदानंदरूपाणि। आधिदैविके पुष्टिः, आध्यात्मिके मर्यादा, आधिभौतिके प्रवाहः। श्रीपुरुषोत्तमस्य सृष्टेरिच्छा यदा जायते तदा रविकाश्मीरयोगे यथा वह्निः प्रजायते तथा काला-